# ॥ ગુરુવરપ્રાર્થનાપઞ્ચરત્નસ્તોત્રમ્ ॥

.. guruvaraprArthanApaMcharatnastotram ..

sanskritdocuments.org

August 20, 2017

# .. guruvaraprArthanApaMcharatnastotram ..

# ॥ ગુરુવરપ્રાર્થનાપઞ્ચરત્નસ્તોત્રમ્ ॥

## Sanskrit Document Information

Text title : guruvaraprArthanApaMcharatnastotram

File name : guruvaraprArthanApaMcharatnastotram.itx

Category : deities_misc, gurudev, stotra

Location : doc_deities_misc

Language : Sanskrit

Subject : philosophy/hinduism/religion

Transliterated by : Dinesh Agarwal dinesh.garghouse at gmail.com

Proofread by : Dinesh Agarwal dinesh.garghouse at gmail.com, PSA Easwaran, NA

Latest update : April 29, 2013, January 21, 2017

Send corrections to : Sanskrit@cheerful.com

Site access : http://sanskritdocuments.org

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

August 20, 2017

*sanskritdocuments.org*

# ॥ ગુરુવરપ્રાર્થનાપઞ્ચરત્નસ્તોત્રમ્ ॥

શ્રીગણેશાય નમઃ ॥

યં વિજ્ઞાતું ભૃગુઃ સ્વાપિતરમુપગતઃ પઞ્ચવારં યથાવ-
જ્ઞ્જ્ઞાનાદેવામૃતાપ્તેઃ સતતમનુપમં ચિદ્વિવેકાદિ લબ્ધ્વા ।
તસ્મૈ તુભ્યં નમઃ શ્રીહરિહરગુરવે સચ્ચિદાનન્દમુક્તા-
નન્તાદ્વૈતપ્રતીતે ન કુરુ કિતવતાં પાહિ માં દીનબન્ધો ॥ ૧॥

યસ્માન્નશ્યસ્ય જન્મસ્થિતિવિલયમિમે તૈતિરીયાઃ પઠન્તિ
સ્વાવિદ્યામાત્રયોગાત્સુખશયનતલે મુખ્યતઃ સ્વપ્નવચ્ચ ।
તસ્મૈ તુભ્યં નમઃ શ્રીહરિહરગુરવે સચ્ચિદાનન્દમુક્તા-
નન્તાદ્વૈતપ્રતીતે ન કુરુ કિતવતાં પાહિ માં દીનબન્ધો ॥ ૨॥

યો વેદાન્તૈકલક્ષ્યઃ શ્રુતિષુ નિવમિતસ્તૈત્તિરીયૈશ્ચ
કાણ્વૈરન્યૈરપ્યાનિષેકાદુદયપરિમિતં ચારુસંસ્કારભાજામ્ ।
તસ્મૈ તુભ્યં નમઃ શ્રીહરિહરગુરવે સચ્ચિદાનન્દમુક્તા-
નન્તાદ્વૈતપ્રતીતે ન કુરુ કિતવતાં પાહિ માં દીનબન્ધો ॥ ૩॥

યસ્મિન્નેવાવસન્નાઃ સકલનિગમવાઙ્મૌલયઃ સુપ્તપુંસિ
પ્રોક્તં તન્નામ યદ્વન્નિજમહિમગતધ્વાન્તતત્કાર્યરૂપે ।
તસ્મૈ તુભ્યં નમઃ શ્રીહરિહરગુરવે સચ્ચિદાનન્દમુક્તા-
નન્તાદ્વૈતપ્રતીતે ન કુરુ કિતવતાં પાહિ માં દીનબન્ધો ॥ ૪॥

ચિત્ત્વાત્સઙ્કલ્પપૂર્વં સૃજતિ જગદિદં યોગિવન્માયયા યઃ
સ્વાત્મન્યેવાદ્વિતીયે પરમસુખદૃશિ સ્વપ્નવદ્ભૂપ્નિ નિત્યે ।
તસ્મૈ તુભ્યં નમઃ શ્રીહરિહરગુરવે સચ્ચિદાનન્દમુક્તા-
નન્તાદ્વૈતપ્રતીતે ન કુરુ કિતવતાં પાહિ માં દીનબન્ધો ॥ ૫॥

ઇત્યચ્યુતવિરચિતં ગુરુવરપ્રાર્થનાપઞ્ચરત્નસ્તોત્રં સમ્પૂર્ણમ્ ॥

Encoded and proofread by Dinesh Agarwal dinesh.garghouse at gmail.com

.. guruvaraprArthanApaMcharatnastotram ..

Searchable pdf was typeset using XeTeXgenerateactualtext feature of XƎLATEX 0.99996
on August 20, 2017

Please send corrections to *sanskrit@cheerful.com*